तस्य कासनाशकत्वात् तथात्वम् २कासनाशकमात्रे त्रि०

**कासार** पु० कस्य जलस्यासारोऽत्र । १सरोवरे विंशत्या रगणै-रचिते २दण्डकच्छन्दोभेदे च वृत्त० टी० । ३पक्वान्नभेदे न० भावप्र०

"घृते तप्ते विनिःक्षिप्य कटाहे पाचयेन्मनाक् । ततस्तत्र विनिःक्षिप्य खण्डं भागसमं पचेत् । ततस्तास्य तत् पात्रे क्षिप्त्वा सम्यक् सुचिक्कणे । चतुरस्त्रीकृतं ह्येतत् भवेत् कासारसंज्ञकम् । कासारं रुचिदं श्रेष्ठं नातिरूक्षं नपिच्छिलम् । हृल्लासकफपित्तघ्नं विरुचौ रुचिकारकम् । प्रक्षिप्य माषशृङ्गाटकशेरूणां पृथक् पृथक् । शालूकस्य च कर्त्तव्यं कासारं खण्डसर्पिषा" । [ विवृतिः ।

**कासारि** पु० ६त० । कासमर्द्दवृक्षे भावप्र० कासमर्द्दशब्दे

**कासालु** पु० कासकारी आलुः । कोङ्कणदेशप्रसिद्धे आलुक-भेदे राजनि०

**कासीस** न० काशीं क्षुद्रकासं स्यति सो—क । (हिराकस) उपधातुभेदे दन्त्यद्वयवानयमित्येके काशीसशब्दे विवृतिः । "कासीसं विहृता दन्ती हरितालं सुराष्ट्रजा" सुश्रु० ।

**कासृति** स्त्री० कुत्सिता सृतिः सरणम् । कुत्सितगतौ "न कासृत्या ग्रामं प्रविशेत्" गोभि०

**कास्तीर** न० ईषत्तीरमस्यास्ति कोःका नि० सुट् । ईषत्तीर-युक्ते नगरभेदे सि०कौ० ।

**कास्मर्य्य** पु० काश्मर्य्य+पृषो० शस्य सः । गाम्भार्य्याम्

**काहका** स्त्री काहला+पृषो० लस्य कः । काहलावाद्ये द्वि-रूपकोषः ।

**काहल** पुंस्त्री कुत्सितं हलति लिखति हल—अच्, कोः का । १विड़ाले २कुक्कुटे, स्त्रियां ङीप् ३शब्दमात्रे पु०४महाढक्कायाम्, स्त्री टाप् मेदि० ५धुस्तूराकारे वाद्यशब्दभेदे ६अप्सरोभेदे स्त्री शब्दच० ७अव्यक्तवाक्ये न० हेमच० । ८शुष्के ६भृशे, १०खले च त्रि० मेदि० ।

**काहलापुष्प** पु० काहलेव पुष्पमस्य । धुस्तूरे शब्दमा०

**काहलि** पु० कं सुखमाहलति ददाति आ+हल+इन् ६त० । १शिवे "सुख्योऽसुख्यश्च देहश्च काहलिः सर्वकामदः" भा० आनु०१७अ० २तरुण्यां युवत्यां स्त्री ङीप् मेदि० ।

**काही** स्त्री ईषदाहन्ति आ+हन—ड गौरा० ङीप् । कुटज-वृक्षे राजनि०

**कि** ज्ञाने जुहो० पर० सक० अनिट् । चिकेति अकैषीत् । चिकाय । वैदिकोऽयं धातुः

**किंयु** त्रि० किमिच्छति मान्तत्वेन निषेधेऽपि वेदे क्यच् ततः छन्दसि उ । किमिच्छौ "किंयुर्विप्रोनद्योजोहवीति" ऋ० १,२१,४, "किंयुः किमिच्छुः" भा०

**किंराजन्** पु० कः कुत्सितो राजा क्षेपार्थत्वात् न टच् समा० । कुत्सिते राजनि । किमः प्रश्नार्थकत्वे तु टच् । किं राज-इत्येव व०व० । किंराजन् निन्दितनृपयुक्ते देशादौ त्रि०

**किंवत्** त्रि० किं विद्यतेऽस्य मतुप् मान्तत्वात् मस्य वः । किं-विशिष्टे स्त्रियां ङीप् । कस्येव कश्चिच्चिव वा वति । किंतुल्यार्थे षष्ठ्यन्तार्थे सप्तम्यन्तार्थे च अव्य० ।

**किंवदन्ति(न्ती)** स्त्री किम्+वद—झिच् वा ङीप् । जनश्रुतौ सत्ये असत्ये वा लोकप्रवादे अमरः । "इति व्याधानां मुखात् किंवदन्ती श्रूयते" हितो० । "अस्ति किलैषा किंवदन्ती—अस्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यते" प्रबोधच०

**किंवा** अव्य० किञ्च वा च द्वन्द्वः । १वितर्के २सम्भावनायां ३पक्षान्तरद्योतने च मेदि० पदद्वयमित्यन्ये

**किंशारु** पु० कुत्सितं शृणाति किम्+शॄ—ञुण् । १धान्याद्यग्रभागे, अम० "शूर्पशोधितकणकिंशारुकांस्तण्डुलान-सकृदद्भिः प्रक्षाल्य" दशकु०२वाणे, ३कङ्कपक्षिणि च मेदि० "किञ्जरयोः श्रिणः" उणा० सू० "शॄ हिंसायाम् इत्यु-ज्ज्वलदत्तोक्तेः शान्तमध्योऽयं शब्दक० दन्त्यमध्यपाठः प्रामादिक एव । गतिकारकोपदत्वेन तत्पु० प्रकृतिस्वरः ।

**किंशुक** पु० किञ्चित् शुक इव शुकतुण्डाभपुष्पत्वात् । १पलाशे अमरः "फलस्तनस्थानविदीर्णरागिहृद्विश-च्छुकास्यस्मरकिंशुकाशुगाम्" नैष० "किंशुकाम्भोजबकु-लचूताशोकादिपुष्पितैः" सुश्रुतः "ते (दैत्या) हेमनिष्का-भरणाः कुण्डलाङ्गदधारिणः । निहता बह्वशोभन्त पुष्पिता इव किंशुकाः" भा०व०१७५अ० । अस्य च निर्ग-न्धत्वम् "विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" चाणक्यः । फलहीनत्वञ्च "अविज्ञाय फलं योहि कर्म्म-त्वेवानुधावति । स शोचेत् फलवेलायां यथा किंशुकसे-चकः" रामा० २नन्दिवृक्षे राजनि०

**किंशुलक** पु० किंशुक+"किंशुलुकादीनाम्" पा०नि०लुमध्यता । पलाशवृक्षे शब्दर० । अस्य गिरिशब्दे परे दीर्घः । किं-शुलकागिरिः (पलाशप्रधानपर्व्वतः)

**किंशुलुकादि** पु० गिरौ परे दीर्घनिमित्ते पा०उक्ते शब्दगणे स च गणः किंशुलुक शाव नड अञ्जन भञ्जन लोहित कुक्कुट ।

**किंस** त्रि० किं स्यति सो—क शकन्ध्वादि० पूर्व्वपदस्य निमित्तात्